# Sarasvatiproktam Krishnastotram

# सरस्वतीप्रोक्तं कृष्णस्तोत्रम्

## Document Information

Text title : kRiShNastotram by Sarasvati from kRRiShNayAmala

File name : kRRiShNastotramsarasvatIproktam.itx

Category : vishhnu, krishna

Location : doc_vishhnu

Proofread by : Tanvir Chowdhury

Description/comments : Krishna Yamala Tantra Adhyaya 11

Latest update : January 28, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# सरस्वतीप्रोक्तं कृष्णस्तोत्रम्

बलराम उवाच -
ततः किमकरोद्देवी किं वा त्वमकरोः प्रभो ।
तन्ममाचक्ष्व भगवन् श्रोतुं कौतूहलं परम् ॥ १५३॥

श्रीकृष्ण उवाच -
बलराम महाभाग भूयो देवी सरस्वती ।
मामेव परितुष्टाव वाग्भिरिष्टाभिरञ्जसा ॥ १५४॥ (रञ्जना)

प्रणयाविष्टहृदया हृदयानन्दकारिणो । (प्रलया)
अजस्रस्रवदस्राक्षी स्वेदवारिप्रपूरिता ॥ १५५॥

सरस्वती उवाच -
जय जय कारण कारणविष्णो जय जयिनां जयि निरयवि जिष्णो ।
जय धरणीधर धरणिपते जय सुजनब्रजवृजिनहते जय ॥ १५६॥

जय गणनायक नाथ हरे जय भवसागर तरणतरे जय ।
जय वृन्दावनविपिनविहारी जयदानवगणमुण्डनकारी ॥ १५७॥ (वृन्दा-विपिनविरजितविहरी, छेत्तत्करी)

जय देवाधिपमौलिविलासी जय चेतो हररूपविकासी ।
जय रससागर करुणासिन्धो जय नवनागर निरुपधिबन्धो ॥ १५८॥

जय जगदुद्भवयोनिरनादे जय वेदात्मक वेदविदादे । (जगदद्भुतयोनि)
जय विषमाशुग समसुषमान्त जय शामितशमनभयसुशान्त ॥ १५९॥

जय कल्पान्तसुकल्पित तल्प जय नतकल्पमहीरुगनल्प ।
जय कमलोदरसोदर दृष्टे जय परिपालितबहुतरसृष्टे ॥ १६०॥ (तुष्टो, परिपाति तवाद्भुतसृष्टे)

जय यमिनां हृदयाम्बुजगामी जय वामाकुलकेलिसुकामी ।
जय पीतांशुकवेष्टितमूर्ते जय मुनिमोहमनोरथपूर्ते ॥ १६१॥

जय रिपुवारिधिशोषाऽगस्ते जय भुवने परिगीतसमस्ते ।
जय युवजनगणमानसचोर जय लीलामयनित्यकिशोर ॥ १६२॥ (युवतिगण)

जय कनकाङ्गदसङ्गतबाहो जय कमलास्य कलानिधिबाहो । (कमलानिधि)
जय जगतीतलवलयनिदान जय नानासुखकलितनिधान ॥ १६३॥

जय कलिकल्मषराशिविमोक्ष जय वरपापिगणार्पितमोक्ष ।
जय नरकिन्नरदनुजनिवन्ध्य जय सुरनागगणैरभि नन्ध्य ॥ १६४॥ (सुरराग, वन्द्य)

जय सेवितपदविपदपनोद जय नित्यं रसकेलिसमोद ।
जय जय हरिहर परिहररोष जय करुणाङ्कुरु मे जहि दोषम् ॥ १६५॥ (हरिरवि परि, करुणाङ्कुर)

नमस्ते समस्तेश्वरस्येश्वराय
नमस्ते नमस्ते महिम्नां वराय ।
प्रसीदावसीदामि गाढं चिराय (प्रसीदावसादाभिगाढं)
प्रभो नीलजीभूतयूथाभकाय ॥ १६६॥

प्रभो त्वत्प्रसादान्न किञ्चापलभ्यं (त्वत्प्रसादात् किञ्चा)
य एवाश्रयन्ते पदं तेऽविलभ्यम् ।
नमस्ते कदम्बस्रजा शोभिताय
नमस्ते सुवर्णांशुकेनावृताय ॥ १६७॥

नमस्ते किरीटे मयूरछदाय
नमस्ते कपोले सपुष्पछदाय ।
नमस्तेस्तु कर्णे मणिकुण्डलाय
नमस्तेमुखाम्भोजनुर्मण्डलाय ॥ १६८॥

नमस्ते कपोलोल्लसच्चन्द्रकाय
नमस्तेऽरुणाम्भोजपत्रेक्षणाय ।
नमस्तेऽरुणौष्ठाय बिम्बाधराय
नमस्ते लसत्स्मेरदिव्यस्मराय ॥ १६९॥ (दीव्यत्स्मराय)

नमस्ते त्रिरेखाढ्यकण्ठोच्छ्रिताय
नमस्ते शिलापीठवक्षस्थलाय
नमस्तेस्तु मुक्ताफलालङ्कृताय

नमस्ते भ्रमत्षटपदैर्झङ्कृताय ॥ १७० ॥

नमस्ते भुजादण्डसमण्डिताय
नमस्तेंऽसचञ्चद्वतंसाश्रिताय ।
नमस्तेऽरुणद्योतपाणिद्वयाय
नमस्तेस्तु नाभीगभीरह्रदाय ॥ १७१ ॥

नमस्तेऽरुणावासपादाम्बुजाय
नमस्ते नखेन्दुद्युतिद्योतिताय ।
नमस्ते मनोभूशतैर्वाञ्छिताय
नमस्ते जगन्मोहसम्मोहनाय ।
नमस्ते नमस्ते नमस्ते प्रियाय (प्रियाय प्रसीद)
प्रसीद प्रभो मे प्रसीद प्रसीद ॥ १७२ ॥ (प्रभो मे प्रसीद)

अहं (श्रीकृष्ण ) उवाच -
इतः परं स्थिरा कान्ते भव त्वं स्थिरमानसे ।
तवैव वदनाम्भोजच्च्यवद्वागमृतार्णवे ॥ १७३ ॥

स्नानात् पानात् सुतृप्तोऽस्मि न त्वां त्यक्ष्यामि मा रुद । (पानात नास्ति)
अद्यानवद्यचरिते करिष्यामि तवेप्सितम् ॥ १७४ ॥ (आढ्यानवद्य)

इदं स्तोत्रं पठिष्यन्ति ये नरा रचितं त्वया ।
तेषामेवास्मि नियतं प्रेमभक्तिप्रदायकः ॥ १७५ ॥

बलरामेत्त्युक्तवीत मयि सा न च किञ्चन ।
प्रोवाच लज्जा पाथोधिनिमग्ना कलितांशुका ॥ १७६ ॥

इति श्रीसरस्वतीप्रोक्तं श्रीकृष्णस्तोत्रं सम्पूर्णम् ।

Proofread by Tanvir Chowdhury

*Sarasvatiproktam Krishnastotram*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*